बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी । स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम्। स्वयं च भगवान् कृष्णः कालीरूपोऽभवद् व्रजे”।भागवते १स्क०तु प्राधान्यतः अन्येऽप्यवतारा उक्ताः यथा “लीलावतारानुरतो देवतिर्य्यङ्नरादिषु” इत्युपक्रम्य । “जगृहे पौरुषं रूपं भगवान् महदादिभिः । संभूतं षोड़शकलमादौ लोकसिसृक्षया । यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजां पतिः। यस्यावयवसंस्थानैः कल्पितोलोकविस्तरः। तद्वै भगवतोरूपं विशुद्धं सत्वमूर्ज्जितम् ।पश्यन्त्यदोरूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् ।सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ।एतन्नानावताराणां निधानं वीजमव्ययम् । यस्यांशांशेन सृज्यन्ते देवतिर्य्यङ्नरादयः । स एव प्रथमं देवः कौमारं सर्गमाश्रितः।चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्१। द्वितीयस्तु भवायास्य रसातलगतां महीम्। उद्धरिष्यन्नुपादत्त यज्ञेशः शौकरं वपुः२।तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्म्मणां यतः३ ।तुर्य्ये धर्म्मकलासर्गे नरनारायणावृषी । भूत्वात्मोपशमोपेतमकरोद्दुश्चरन्तपः४।पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्५ ।षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनुसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्६। ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत सतामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरम् । ७अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः ।दर्शयन् वर्त्म धीराणां सर्व्वाश्रमनमस्कृतम्८ । ऋषिभिर्याचितोभेजे नवमं पार्थिवं वपुः ।दुग्धेमामोषधीर्विप्रास्तेन यः स उशत्तमः ९। रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंप्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्१०। सुरासुराणामुदधिं मथ्नतां मन्दराचलम् । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ११। धान्वन्तरं द्वादशमं त्रयोदशममेव च १२। अपाययत् सुरानन्यान्मोहिन्याऽमोहयत् स्त्रिया १३। चतुर्द्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् । ददार करजैरूरावेरकां कटकृद्यथा१४ । पञ्चदशं वामनकं कृत्वागादध्वरं बलेः । पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपम्। १५। अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहोनृपान् । त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् १६ । ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः । १७।नरदेवत्वमापन्नः सुरकार्य्यचिकीर्षया। समुद्रनिग्रहादीनि चक्रे वीर्य्याण्यतःपरम् १८ । एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरम् १९।२०।ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् । बुद्धोनाम्नाजिनसुतः कीकटेषु भविष्यति ।२१।अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २२।अवताराह्यसङ्ख्येया हरेः सत्त्वनिधेर्द्विजाः। यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः । ऋषयो मनवोदेवा मनुपुत्रा महौजसः । कलाः सर्व्वे हरेरेव सप्रजापतयः स्मृताः । एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे” । “कस्मिन् काले स भगवान् किंवर्णः कीदृशोनृभिः। नाम्ना केन विधानेन पूज्यते तदिहोच्यताम्” । इति प्रश्ने । “कृतं त्रेता द्वापरञ्च कलिरित्येषु केशवः । नानावर्णाभिधाकारो नानैव विधिनेज्यते । कृते शुक्लश्चतुर्बाहुर्जटिलोवल्कलाम्बरः । कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डं कमण्डलुम्। मनुष्यास्तु तदा शान्ता निर्व्वैराः सुहृदः समाः । यजन्ति तपसा देवं शमेन च दमेन च । हंसः सुपर्णो वैकुण्ठोधर्म्मोयोगेश्वरोऽमलः । ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते । त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्तु मेखलः । हिरण्यकेशस्त्वव्यक्तः स्रुक्स्रुवाद्युपलक्षणः। तं तदा मनुजा देवं सर्व्वदेवमयं हरिम्। यजन्ति विद्यया त्रय्या धर्म्मिष्ठा ब्रह्मवादिनः । विष्णुर्यज्ञः पृश्निगर्भः सर्व्वदेव उरुक्रमः । वृषाकपिर्जयन्तश्च उरुगाय इतीर्य्यते । द्वापरे भगवान् श्यामः पीतवासा निजायुधः। श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः । तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् । यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप! । नमस्ते वासुदेवाय नमः सङ्कर्षणाय च। प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः।नारायणाय ऋषये पुरुषाय महात्मने। विश्वेश्वराय विश्वाय सर्व्वभूतात्मने नमः । इति द्वापर उर्व्वीश स्तुवन्ति जगदीश्वरम्। नाना तन्त्रविधानेन कलावपि यथा शृणु । कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् । यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः । ध्येयं सदापरिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् । भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ! ते चरणारविन्दम् भा० ११ स्कन्द० । अन्यत्र अवतारभेदस्तत्रैवोक्तः “हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभोभगवान् पिता नः । विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृतामधुभिदा